# Onkarah (Pranavah)

# ઓઙ્કારઃ (પ્રણવઃ )

## Document Information

Text title : OMkAraH lekhaH

File name : OMkAraHlekhaH.itx

Category : misc, article

Location : doc_z_misc_general

Author : Dr. Ramapratap Tiwari

Transliterated by : Saritha Sangameswaran

Proofread by : Saritha Sangameswaran

Latest update : February 11, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 11, 2026

*sanskritdocuments.org*

# Onkarah (Pranavah)

# ઓઙ્કારઃ (પ્રણવઃ )

વૈદિકમન્ત્રોચ્ચારણાત્પૂર્વમુચ્ચાર્યમાણોઽખિલકલ્મષાપહારકોઽખિલવિશ્વરક્ષકઃ માઙ્ગલિકશ્ચાસ્તિ “ઓઙ્કાર” ઇતિ શબ્દઃ ।

કિમયમોઙ્કારઃ? અવતિ-રક્ષતિ ઇત્યોઙ્કારઃ । ઓઙ્કારો બ્રહ્મણઃ પુત્રઃ ગોત્રશ્ચ । ગાં-પૃથિવીં ત્રાયત ઇતિ ગોત્રઃ”(૧) । બ્રાહ્મણો જાતઃ બ્રહ્માઽચિન્તયદ્- “અહં કેનૈકેનાક્ષરેણાખિલં વિશ્વં રચયામિ ?પુનશ્ચોઙ્કારાદખિલં વિશ્વમરચયંત્ ।

અસુરૈઃ પરાવૃતાઃ દેવા એકદા “ઓઙ્કારં સાહાય્યાર્થં પ્રાર્થિતવન્તઃ । ઓઙ્કારેણોક્તમ્-” કિં મે પ્રતિફલં ભવિષ્યતિ? પુનર્દેવૈરુક્તમ્ - વરં વૃણીષ્વ । તદા ઓઙ્કારેણ પુનરુક્તમ્- ઓઙ્કારમુચ્ચારયિત્વૈવ જનાઃ વેદમન્ત્રં વદેયુરન્યથાલં તેન મન્ત્રોચ્ચારણેન(૨) । ઓઙ્કારં પુરસ્કૃત્ય દેવા અસુરાન્ પરાજિતવન્તસ્તસ્માદેવૌઙ્કારસ્યોચ્ચારણં સર્વેષાં મન્ત્રાણામુચ્ચારણાત્પૂર્વમેવ ક્રિયતે(૩) ।

ૐ ઇતિ પદસ્ય કોઽર્થઃ ? - “ઓઙ્કાર” ઇત્યસ્મિન્ પદે “આપૃ” વ્યાપ્તૌ ધાતુઃ । સર્વં વ્યાપ્નોતિ ઇતિ “ઓઙ્કારઃ” । ઓમિતિ બ્રહ્મ(૪) । ઓમિતીદં સર્વમ્ । બૃહત્તમત્વાદેવ “બ્રહ્મ” ઇત્યુચ્યતે । તચ્ચ સર્વત્ર વર્તતે-ઈશાવાસ્યમિદં સર્વમ્ (ઈશોપનિષદ્) ।

“અવ્” રક્ષણે ધાતોર્નિષ્પદ્યતે “ઓઙ્કાર” ઇતિ પદમ્ । અવતિ રક્ષત્યખિલં વિશ્વિમિતિ ઓઙ્કારઃ । સર્વત્ર વ્યાપકત્વાદેવ “ઓઙ્કારઃ” સર્વેષાં રક્ષકઃ । ઓમિતિ બ્રહ્મ । યતો વા ઇમાનિ ભૂતાનિ જાયન્તે, યેન જાતાનિ જીવન્તિ, યં પ્રયન્ત્યભિસંવિશન્તિ તદ્વિજિજ્ઞાસસ્વ તદ્ બ્રહ્મ । ઓઙ્કારસ્ય બ્રહ્મરૂપત્વાદ્ ઓઙ્કારાદેવ ઇમાનિ ભૂતાનિ જાયન્તે, ઓઙ્કારેણ જાતાનિ જીવન્તિ ઓઙ્કારમભિસવિશન્તિ સર્વાણિ ભૂતાનિ । અતઃ મોક્ષપ્રાપ્તયે મુમુક્ષુના ઓઙ્કારસ્ય જ્ઞાનમભિધ્યાનઞ્ચ કર્તવ્યમ્ । ૐ ખં બ્રહ્મ । આકાશોઽપિ વિભુત્વાદ્ બ્રહ્મ ઇત્યુચ્યતે । તદેવ ઓઙ્કાર ઇતિ । ઓમિતિ પદસ્ય “આમ્” સ્વીકૃતિરિત્યર્થઃ । અમરકણ્ટકપર્વતસ્ય મધ્યે નર્મદાતટે ઓઙ્કારસ્તીર્થમસ્તિ । તત્રાવશ્યમેવ ગન્તવ્યમ્ । તત્ર પાપનાશનમર્ચનં દર્શનં દુર્લભં વર્તતે(૫) ।

ઓઙ્કારસ્ય પર્યાયાઃ- ૐ, ઓઙ્કારઃ, ઓમ્, પ્રણવઃ, બ્રહ્મ, ઉદ્ગીથઃ, આદિત્ય ઇતિ પર્યાયાઃ । ય ઉદ્ગીથઃ સઃ પ્રણવઃ । એષઃ પ્રણવ ઓમિતિ । નિશ્ચિતં ય ઉદ્ગીથઃ સઃ પ્રણવઃ , યઃ પ્રણવઃ સ ઉદ્ગીથઃ । આદિત્ય ઉદ્ગીથઃ । આદિત્ય ૐ ઇતિ સ્વરન્ ગચ્છતિ, તસ્માદોઙ્કારસ્યોપાસના કર્તવ્યા । ૐ ઇત્યુચ્ચારયન્ ઉદ્ગાતા સામવેદસ્યોદ્ગાનં કરોતિ ।

પ્રણવઃ - ઓઙ્કાર એવ પ્રણવઃ । પ્રકર્ષેણ નૂયતે સ્તૂયતેઽનેન ઇતિ પ્રણવઃ । પ્રણવ ઈશ્વરસ્ય વાચક ઇતિ યોગદર્શને નિર્દિષ્ટમ્ । આત્મા શરોઽસ્તિ । પ્રણવો ધનુરસ્તિ । બ્રહ્મ ચ તલ્લક્ષ્યમસ્તિ । યથા ધનુરાશ્રિત્ય બાણઃ સ્વલક્ષ્યં

લક્ષિતું શક્યતે તથૈવાત્માપિ પ્રણવમાશ્રિત્ય સ્વલક્ષ્યં બ્રહ્મ પ્રાપ્ય બ્રહ્મૈવ ભવતિ(૬) ।

ઓઙ્કારસ્યોત્પત્તિઃ - ૐકારો બ્રહ્મ ઇતિ સ્વીકૃતઃ । સત્યં જ્ઞાનમનન્તં બ્રહ્મ । ઓમિત્યેકાક્ષરં બ્રહ્મ । તસ્ય જન્મનૈવ ભવિતં શક્નોતિ । અતઃ પારમાર્થિકદૃષ્ટ્યા નૈવોઙ્કારસ્યોત્પત્તિર્જાયતે, કિન્તુ વ્યાવહારિકદૃષ્ટ્યા તસ્યોત્પત્તિઃ સ્વીક્રિયતે । પુરા ઓઙ્કારશ્ચ શબ્દશ્ચ એતૌ દ્વાવપિ બ્રહ્મણઃ કણ્ઠં ભિત્ત્વા વિનિર્ગતૌ । બ્રહ્મણઃ કણ્ઠાદ્ વિનિર્ગતત્વાદેતૌ માઙ્ગલિકૌ સ્તઃ(૭) ।

અકારોકારમકારણાં સમુચ્ચય એવ ઓઙ્કારઃ । અકારં ચ ઉકારં ચ મકારં ચ પ્રજાપતિર્વેદત્રયાદદુહત્(૮) । યદ્ વચઃ ઓઙ્કારેણારભ્યતે તસ્ય વેદવાચઃઉત્પત્તિસ્થાનં બ્રહ્મા એવ ।

ઓઙ્કારબ્રહ્મણોઃ સમ્બન્ધઃ - ઓમિતિ બ્રહ્મ । ૐ તત્ સદિતિ બ્રહ્મ ત્રિરૂપેણ નિર્દિશ્યતે(૯) । યદ્યપિ બ્રહ્મ નિર્ગુણં નામરૂપાભ્યાં વિરહિતમસ્તિ તથાપિ તમવગન્તું વ્યાવહારિકદૃષ્ટ્યા ઓમ્, ૐ, તત્, સદિત્યેતાનિ તસ્ય નામાનિ સાધનાનિ સન્તિ । ઓઙ્કાર એવાક્ષરં બ્રહ્મ । એતદેવાક્ષરં પરબ્રહ્મોપસ્ય મુમુક્ષુર્યદભિલષતિ તદેવાપ્નોતિ(૧૦) । ઓઙ્કારસ્ય “અકારમ્” બ્રહ્મણો રૂપમ્ “ઉકારમ્” વિષ્ણુરૂપં મકારઞ્ચ શિવરૂપમસ્તિ(૧૧) । અર્દ્ધમાત્રઞ્ચ પરબ્રહ્મરૂપમસ્તિ” । ઇત્થમેકસ્મિન્નેવ ઊઁકારે બ્રહ્માવિષ્ણુમહેશાદયો દેવાઃ સમાહિતાઃ । ઓઙ્કારે સર્વે દેવાઃ સમાહિતાસ્તસ્માદેવાયમ્ ઓઙ્કારઃ પરબ્રહ્મેત્યુચ્યતે । પ્રણવઃ સર્વત્ર વ્યાપિત્વાદ્ દેવીરૂપેણાપિ સ્વીક્રિયતે(૧૨) ।

ઓઙ્કારસ્ય મહત્ત્વમ્ - યથા નારીષુ પાર્વતી સદા વન્દનીયા પૂજ્યા ચાસ્તિ, યથા રસેષુ સદૈવેક્ષુરસઃ શ્રેષ્ઠોઽસ્તિ, એવમેવ સર્વમન્ત્રેષુ પ્રણવઃ પ્રમુખોઽસ્તિ(૧૩) । ઓઙ્કાર એવ બ્રહ્મણો નેદિષ્ઠં સાધનમસ્તિ । ઓઙ્કારસ્ય જપધ્યાનાભ્યામાત્મપ્રાપ્તિર્જાયતે । તજ્જપસ્તદર્થભાવનમિતિ યોગસૂત્રેણ નિર્દિષ્ટમ્ । બ્રહ્મપ્રાપ્તૌ “ઓઙ્કાર” એવ શ્રેષ્ઠાલમ્બનમ્ । ઓઙ્કારં જ્ઞાત્વા મુમુક્ષુર્બ્રહ્મલોકં પ્રાપ્ય મહિમાન્વિતો જાયતે ।

ઓઙ્કારઃ સ્વર્ગદ્વારમ્(૧૪) । પ્રણવ એવ સર્વેષામાદિર્મધ્યોઽન્તશ્ચ । પ્રણવં જ્ઞાત્વા મુમુક્ષુસ્તદ્રૂપ એવ જાયતે । પ્રણવઃ સર્વેષાં હૃદિ સ્થિત ઈશ્વર એવ । સર્વવ્યાપિનમોઙ્કારં જ્ઞાત્વા વિદ્વાન્ શોકાદ્ વિમુચ્યતે(૧૫) ।

દ્વૈતોપશમસ્થાનં મઙ્ગલમયમોઙ્કારં યો જાનાતિ સ મુનિરિત્યુચ્યતે ઓઙ્કારો નિર્ભયં બ્રહ્મપદમ્ । ઓઙ્કારે નિત્યસમાહિતચિત્તસ્ય કુતશ્ચિદ્ ભયં ન જાયતે(૧૬) । ઓઙ્કારમવલમ્બ્ય વિદ્વાંસ્તલ્લોકમાપ્નોતિ યચ્છાન્તમજરમભયં પરઞ્ચાસ્તિ(૧૭) ।

“ૐ” ઇત્યેકાક્ષરં બ્રહ્માસ્તિ । ઓમિત્યેકાક્ષરમુચ્ચારયન્ ભગવન્તં શ્રીકૃષ્ણઞ્ચાનુસ્મરન્ યો દેહં ત્યજતિ સ પરં પદં પરમાં ગતિઞ્ચ પ્રાપ્નોતિ(૧૮) ।

ઓઙ્કારરૂપબ્રહ્મધ્યાનપૂર્વકયથાશક્તિજપેન સન્ધ્યઙ્ગજપઃ સિદ્ધ્યતિ । યોગસિદ્ધ્યે ઓઙ્કાર ઓઙ્કારસ્યોચ્ચારણં પ્રમુખં સાધનમસ્તિ(૧૯) ।

ઓઙ્કારસ્ય પ્રયોગઃ - પ્રણવઃ છન્દસામાદ્યોઽસ્તિ(૨૦) । અતઃ મન્ત્રાણામુચ્ચારણાત્પ્રાગેવ પ્રણવ ઉચ્ચાર્યતે । બ્રહ્મવાદિનાં શાસ્ત્રવિધિવિહિતાઃ યજ્ઞદાનતપરૂપક્રિયાઃ સદૈવ ઓઙ્કારસ્યોચ્ચારણેનારભ્યન્તે(૨૧) ।

યો સર્વત્રોન્નતિમિચ્છતિ સ ઓઙ્કારં ધ્યાયેત્ તચ્ચ જપેત્(૨૨) । વેદાનામધ્યયનાત્પૂર્વમ્ અન્તે ચ ઓઙ્કારં સર્વઃ સદા ઉચ્ચારયતુ(૨૩) । ગાયત્રીમન્ત્રોચ્ચારણાત્પ્રાગેવોઙ્કાર ઉચ્ચાર્યતે । અયમેવ એકઃ પવિત્રઃ પાપનાશકોઽન્તઃકરણનિર્મલકારકઃ મન્ત્રેષુ “આદૌ” ઉચ્ચારણીયોઽસ્તિ ।

કોઽયમોઙ્કારસ્યાધિકારી - “અથાતો બ્રહ્મજિજ્ઞાસા” (બ્રહ્મસૂત્રમ્ ૧/૧/૧) । અસ્મિન્ સૂત્રે “અથ” “અતઃ બ્રહ્મજિજ્ઞાસેતિ ત્રીણિ પદાનિ સન્તિ । બ્રહ્મૈવ મોક્ષરૂપં નિઃશ્રેયસ્ ફલમ્, અતઃ મુમુક્ષુના બ્રહ્મણો જિજ્ઞાસા કર્તવ્યા । સાધનચતુષ્ટયપ્રાપ્ત્યનન્તરમેવાત્યન્તનિર્મલસ્વાન્તો મુમુક્ષુર્બ્રહ્માવગન્તું શક્નોતિ । નિત્યાનિત્યવસ્તુવિવેકેહામુત્રાર્થફલભોગવિરાગશમદમાદિસમ્પત્ષટ્ક મુમુક્ષુત્વાનિ ઇતિ ચત્વારિ સાધનાનિ । સાધનચતુષ્ટયંસમ્પન્નઃ પ્રમાતા અધિકારી ઓઙ્કારં બ્રહ્માવગન્તું શક્નોતિ । બ્રહ્મોપાસનાયાઃ સાધનરૂપેણ “ઓઙ્કારઃ” જપ્યતે, ધ્યાયતે ચ । યથા વિષ્ણવાદીનાં પ્રતિમાસુ વિષ્ણુચિન્તનમભેદરૂપેણ ક્રિયતે, એવમેવ ઓઙ્કારે બ્રહ્મણશ્ચિન્તનમભેદરૂપેણ ક્રિયતે । પ્રાયશ્ચિદ્દુષ્ટાનાર્થમ્ । “ઓઙ્કારપૂર્વકાષ્ટસહસ્રગાયત્રીમન્ત્રાણાં જપઃ કર્તવ્યઃ । બ્રહ્મપ્રાપ્તૌ ઓઙ્કારસ્તાદૃશમેવ સાધનં યથા કસ્યચિત્પુરુષસ્ય પ્રાપ્તૌ તસ્ય નામ સાધનં ભવંતિ । ઓઙ્કારસ્ય જપેન, તસ્ય ધ્યાનેન ચ ચિત્તં શાન્તમેકાગ્રચ્ચ ભવતિ ।

યોગિનો બિન્દુસંયુક્તં કામદં મોક્ષદમોઙ્કારં નિત્યં ધ્યાયન્તિ(૨૪) । ઓમિતિ બ્રહ્મ । તસ્ય ધ્યાનેન જપેન ચ બ્રહ્મજ્ઞાનં જાયતે । બ્રહ્મવેદ બ્રહ્મૈવ ભવતિ । ઓઙ્કારે સર્વે દેવાઃ સમાહિતાઃ વર્તન્તે । ઓઙ્કાર એવ પરબ્રહ્મ । તસ્ય જપેન તદર્થભાવનેન ચ યોગસિદ્ધિરચિરેણ જાયતે । યજ્ઞાદીનામારમ્ભોઽપિ “ઓઙ્કારોચ્ચારણપૂર્વકં ભવતિ । ઓઙ્કાર એવ સર્વેષાં રક્ષકઃ, બ્રહ્મપ્રાપ્તૌ મુખ્યસાધનમ્ અસ્તિ । ઓઙ્કાર એવ મોક્ષદઃ, કામદઃ, સર્વકલ્મષવિનાશકો માઙ્ગલિકસ્તસ્માત્તસ્મૈ ઓઙ્કારાય નમઃ તસ્મૈ ઓઙ્કારાય નમઃ

## સન્દર્ભાઃ

૧. કિમયમોઙ્કારઃ, કસ્ય પુત્રઃ । ગોપથબ્રાહ્મણઃ, પૂર્વભાગઃ ૧/૨૫ ગોત્રઃ બ્રહ્મણઃ પુત્રઃ । તત્રૈવ ૧/૨૫
૨. ન મામનીરયિત્વા બ્રાહ્મણાઃ બ્રહ્મ વદેયુર્યદિ વદેયુરબ્રહ્મ તત્ સ્યાદિતિ । ગોપથ બ્રાહ્મણઃ,પૂર્વભાગઃ ૧/૨૫
૩. ઓઙ્કારેણાગ્રીધ્રીયાદ્ દેવા અસુરાન્ પરાભાવયન્ત તદ્ યત્ પરાભાવયન્ત તસ્માદોઙ્કારઃ પૂર્વમુચ્યતે । તત્રૈવ ૧/૨૨
૪. ઓમિતિ બ્રહ્મ । ઓમિતીદં સર્વમ્ । તૈત્તરીયોપનિષદ્ ૧/૮/૧
૫. ઊઁકારેશ્વરયાત્રા ચ કાર્યાત્રૈવ મુનીશ્વર ।
દુર્લભં વાર્ચનં તત્ર દર્શનં પાપનાશનમ્ ॥ નારદપુરાણમ્, પૂર્વખણ્ડઃ ૧૨૩/૧૪
૬. પ્રણવો ધનુઃ શરો હ્યાત્મા બ્રહ્મ તલ્લક્ષ્યમુચ્યતે ।
અપ્રમત્તેન વેદ્ધવ્યં શરવત્તન્મયો ભવેત્ ॥ દેવીભાગવતપુરાણમ્ ૭/૩૬, વાયુપુરાણમ્ ૨૦/૫
૭. ઊઁકારશ્ચાથ શબ્દશ્ચ દ્વાવેતૌ બ્રહ્મણઃ પુરા ।
કણ્ઠં ભિત્ત્વા વિનિર્યાતૌ તસ્માન્માઙ્ગલિકાવિમૌ ॥ નારદપુરાણમ્, પૂર્વખણ્ડઃ ૫૧/૧૦
૮. અકારં ચાપ્યુકારં ચ મકારં ચ પ્રજાપતિઃ ।

વેદત્રયાન્નિરદુહદ્ ભૂર્ભુવઃ સ્વરિતીતિ ચ ॥ મનુસ્મૃતિઃ ૨૭૬
૯. ૐ તત્સદિતિ નિર્દેશો બ્રહ્મણસ્ત્રિવિધઃ સ્મૃતઃ । શ્રીમદ્ભગવદ્ગીતા ૧૭/૨૩
૧૦. એતદેવાક્ષરં બ્રહ્મ એતદેવાક્ષરં પરમ્ ।
એતદેવાક્ષરં જ્ઞાત્વા યો યદિચ્છતિ તસ્ય તત્ ॥ કઠોપનિષદ્ ૧/૨/૬
૧૧. અકારં બ્રહ્મણો રૂપમુકારં વિષ્ણુરૂપવત્ ।
મકારં રુદ્રરૂપં સ્યાદર્ધમાત્રં પરાત્મકમ્ ॥ નારદપુરાણમ્, પૂર્વખણ્ડઃ ૩૪/૫૫
૧૨. નમઃ પ્રણવરૂપાયૈઃ । દેવીભાગવતપુરાણમ્ ૭/૩૧/૫૩
૧૩. પ્રણવઃ સર્વમન્ત્રાણાં નારીણાં પાર્વતી યથા ।
તથા રસાનાં પ્રવરઃ સદૈવેક્ષુરસો મતઃ ॥ મત્સ્યપુરાણમ્ ૮૬/૬
૧૪. ઓઙ્કારસ્વર્ગદ્વારં તસ્માદ્ બ્રહ્માધ્યેષ્યમાણ એતદાદિપ્રતિપદ્યતે । આપસ્તમ્બધર્મસૂત્રમ્, પ્રથમપ્રશ્નઃ ૧૩/૬
૧૫. પ્રણવં હીશ્વરં વિદ્યાત્ સર્વસ્ય હૃદિ સંસ્થિતમ્ ।
સર્વવ્યાપિનમોઙ્કારં મત્વા ધીરો ન શોચતિ ॥ માણ્ડૂક્યોપનિષદ્, આગમપ્રકરણમ્ ૨૮
૧૬. યુઞ્જીતપ્રણવે ચેતઃ પ્રણવો બ્રહ્મનિર્ભયમ્ ।
પ્રણવે નિત્યયુક્તસ્ય ન ભયં વિદ્યતે ક્વચિત્ ॥ માણ્ડૂક્યોપનિષદ્, આગમપ્રકરણમ્ ૨૫
૧૭. તમોઙ્કારેણૈવાયતનેનાન્વેતિ વિદ્વાન્ ।
યત્તચ્છાન્તમજરમમૃતમભયં પરં ચેતિ ॥ પ્રશ્નોપનિષદ્ ૫/૭
૧૮. ઓમિત્યેકાક્ષરં બ્રહ્મ વ્યાહરન્ મામનુસ્મરન્ ।
યઃ પ્રયાતિ ત્યજન્ દેહં સ યાતિ પરમાં ગતિમ્ ॥ શ્રીમદ્ભગવદ્ગીતા ૮/૧૩
૧૯.ઓઙ્કારપદમેવૈકં યોગિનાં યોગસિદ્ધયે । શાણ્ડિલ્યસ્મૃતિઃ ૫/૬૩
૨૦. આદ્યઃ પ્રણવઃ છન્દસામિવ-રઘુવંશમ્ મહાકાવ્યમ્ ૧/૧૧
૨૧. તસ્માદોમિત્યુદાહૃત્ય યજ્ઞદાનતપઃ ક્રિયાઃ ।
પ્રવર્તન્તે વિધાનોક્તાઃ સતતં બ્રહ્મવાદિનામ્ ॥ શ્રીમદ્ભગવદ્ગીતા ૧૭/૨૪
૨૨. અભિજિંઘાસુઃ પુરસ્તાદોઙ્કારં પ્રયુઙ્ક્ત । ગોપથબ્રાહ્મણઃ, પૂર્વભાગઃ ૧/૨૨
૨૩. બ્રાહ્મણઃ પ્રણવં કુર્યાદાદાવન્તે ચ સર્વદા । મનુસ્મૃતિઃ ૨/૭૪
૨૪. ઊઁકારં બિન્દુસંયુક્તં નિત્યં ધ્યાયન્તિ યોગિનઃ ।
કામદં મોક્ષદં ચૈવ ઊઁકારાય નમો નમઃ ॥
શ્રીરુદ્રયામલે ઉમામાહેશ્વરસંવાદે શિવષડક્ષરસ્ત્રોતમ્ ।

લેખકઃ - ડૉ રામપ્રતાપ તિવારી,
અધ્યક્ષઃ સંસ્કૃતવિભાગે

હે૦ન૦બ૦ ગઢ઼્વાલવિશ્વવિદ્યાલયસ્ય
શ્રીનગરમ્, ઉત્તરાઞ્ચલઃ

Encoded and proofread by Saritha Sangameswaran

*Onkarah (Pranavah)*

pdf was typeset on February 11, 2026

Please send corrections to *sanskrit@cheerful.com*